श्रीमते रामानुजाय नमः

# जितन्ते स्तोत्रं

जितन्ते पुण्डरीकाक्ष! नमस्ते विश्वभावन!।
नमस्तेस्तु हृषिकेष! महापुरुष! पूर्वज!॥ १

देवानां दानवानां च सामान्यमधिदैवतं।
सर्वदा चरणद्वन्द्वं व्रजामि शरणं तव॥ २

एकस्त्वमसि लोकस्य स्रष्टा सम्हारकस्तथा।
अध्यक्षश्चानुमन्ता च गुणमाया समावृतः॥ ३

सम्सार सागरं घोरमनन्त क्लेशभाजनं।
त्वामेव शरणं प्राप्य निस्तरन्ति मणीषिणः॥ ४

न ते रूपं न चाकारो नायुधानि न चास्पदं।
तथापि पुरुषाकारो भक्तानां त्वं प्रकाशसे॥ ५

नैव किञ्चित्परोक्षन्ते प्रत्यक्षोसि न कस्यचित्।
नैव किञ्चिदसिद्धन्ते न च सिद्धोसि कस्यचित्॥ ६

कार्याणां कारणं पूर्वं वचसां वाच्यमुत्तमं।
योगानां परमां सिद्धिं परमं ते पदं विदुः॥ ७

अहं भीतोस्मि देवेश! सम्सारेस्मिन् भयावहे।
पाहि मां पुण्डरीकाक्ष! न जाने शरणं परं॥ ८

श्रीमते रामानुजाय नमः

कालेष्वपि च सर्वेषु दिक्षु सर्वासु चाच्युत!।
शरीरे च गतौ चापि वर्तते मे महद्भयं॥ ९

त्वत्पाद कमलादन्यन्न मे जन्मान्तरेष्वपि।
निमित्तं कुशलस्यास्ति येन गच्छामि सद्गतिं॥ १०

विज्ञानं यदिदं प्राप्तं यदिदं स्थानमार्जितं।
जन्मान्तरेपि मे देव! माभूत्तस्य परिक्षयः॥ ११

दुर्गतावपि जातायां त्वद्गतो मे मनोरथः।
यदि नाशं न विन्देत तावतास्मि कृती सदा॥ १२

न कामकलुषं चित्तं मम ते पादयोः स्थितं।
कामये वैष्णवत्वं तु सर्वजन्मसु केवलं॥ १३

इत्येवमनया स्तुत्या स्तुत्वा देवं दिने दिने।
किङ्करोस्मीति चात्मानं देवायैवं निवेदयेत्॥ १४

सोहं ते देवदेवेश! नार्चनादौ स्तुतौ न च।
सामर्थ्यवान् कृपामात्रमनोवृत्तिः प्रसीद मे॥ १५

उपचारापदेशेन कृतानहरहर्मया।
अपचारानिमान् सर्वान् क्षमस्व पुरुषोत्तम॥ १६

**प्रथम जितन्ते स्तोत्रं सम्पूर्णं**